# DakShinamurti Upanishad

# દક્ષિણામૂર્ત્યુપનિષત્

## Document Information

Text title : DakShinamurti Upanishad

File name : dakshina_upan.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 49 / 108; Krishna Yajurveda - Shaiva upanishad

Latest update : Mar. 19, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 11, 2024

*sanskritdocuments.org*

# દક્ષિણામૂર્ત્યુપનિષત્

યન્મૌનવ્યાખ્યયા મૌનિપટલં ક્ષણમાત્રતઃ ।
મહામૌનપદં યાતિ સ હિ મે પરમા ગતિઃ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ બ્રહ્માવર્તે મહાભાણ્ડીરવટમૂલે મહાસત્રાય સમેતા
મહર્ષયઃ શૌનકાદયસ્તે હ સમિત્પાણયસ્તત્ત્વજિજ્ઞાસવો
માર્કણ્ડેયં ચિરઞ્જીવિનમુપસમેત્ય પપ્રચ્છુઃ કેન ત્વં
ચિરં જીવસિ કેન વાનન્દમનુભવસીતિ । પરમરહસ્યશિવ-
તત્ત્વજ્ઞાનેનેતિ સ હોવાચ । કિં તત્પરમરહસ્યશિવતત્ત્વજ્ઞાનમ્ ।
તત્ર કો દેવઃ । કે મન્ત્રાઃ । કો જપઃ । કા મુદ્રા । કા નિષ્ઠા ।
કિં તજ્જ્ઞાનસાધનમ્ । કઃ પરિકરઃ । કો બલિઃ । કઃ કાલઃ ।
કિં તત્સ્થાનમિતિ । સ હોવાચ । યેન દક્ષિણામુખઃ શિવોઽપરોક્ષીકૃતો
ભવતિ તત્પરમરહસ્યશિવતત્ત્વજ્ઞાનમ્ । યઃ સર્વોપરમે કાલે
સર્વાનાત્મન્યુપસંહૃત્ય સ્વાત્માનન્દસુખે મોદતે પ્રકાશતે
વા સ દેવઃ । અત્રૈતે મન્ત્રરહસ્યશ્લોકા ભવન્તિ । મેધા
દક્ષિણામૂર્તિમન્ત્રસ્ય બ્રહ્મા ઋષિઃ । ગાયત્રી છન્દઃ ।
દેવતા દક્ષિણાસ્યઃ । મન્ત્રેણાઙ્ગન્યાસઃ । ૐ આદૌ નમ ઉચ્ચાર્ય
તતો ભગવતે પદમ્ । દક્ષિણેતિ પદં પશ્ચાન્મૂર્તયે પદમુદ્ધરેત્ ॥ ૧॥

અસ્મચ્છબ્દં ચતુર્થ્યન્તં મેધાં પ્રજ્ઞાં પદં વદેત્ ।
સમુચ્ચાર્ય તતો વાયુબીજં ચ્છં ચ તતઃ પઠેત્ ।
અગ્નિજાયાં તતસ્ત્વેષ ચતુર્વિંશાક્ષરો મનુઃ ॥ ૨॥

ધ્યાનમ્ ॥

સ્ફટિકરજતવર્ણં મૌક્તિકીમક્ષમાલા-
મમૃતકલશવિદ્યાં જ્ઞાનમુદ્રાં કરાગ્રે ।
દધતમુરગકક્ષ્યં ચન્દ્રચૂડં ત્રિનેત્રં
વિધૃતવિવિધભૂષં દક્ષિણામૂર્તિમીડે ॥ ૩॥

મન્ત્રેણ ન્યાસઃ ।
આદૌ વેદાદિમુચ્ચાર્ય સ્વરાદ્યં સવિસર્ગકમ્ ।
પઞ્ચાર્ણં તત ઉદ્ધૃત્ય અન્તરં સવિસર્ગકમ્ ।
અન્તે સમુદ્ધરેત્તારં મનુરેષ નવાક્ષરઃ ॥ ૪॥

મુદ્રાં ભદ્રાર્થદાત્રીં સ પરશુહરિણં બાહુભિર્બાહુમેકં
જાન્વાસક્તં દધાનો ભુજગબિલસમાબદ્ધકક્ષ્યો વટાધઃ ।
આસીનશ્ચન્દ્રખણ્ડપ્રતિઘટિતજટાક્ષીરગૌરસ્ત્રિનેત્રો
દદ્યાદાદ્યઃ શુકાદ્યૈર્મુનિભિરભિવૃતો ભાવશુદ્ધિં ભવો નઃ ॥ ૫॥

મન્ત્રેણ ન્યાસઃ બ્રહ્મર્ષિન્યાસઃ -
તારં બ્લૂંનમ ઉચ્ચાર્ય માયાં વાગ્ભવમેવ ચ ।
દક્ષિણાપદમુચ્ચાર્ય તતઃ સ્યાન્મૂર્તયે પદમ્ ॥ ૬॥

જ્ઞાનં દેહિ પદં પશ્ચાદ્વહ્નિજાયાં તતો ન્યસેત્ ।
મનુરષ્ટાદશાર્ણોઽયં સર્વમન્ત્રેષુ ગોપિતઃ ॥ ૭॥

ભસ્મવ્યાપાણ્ડુરઙ્ગઃ શશિશકલધરો જ્ઞાનમુદ્રાક્ષમાલા-
વીણાપુસ્તૈર્વિરાજત્કરકમલધરો યોગપટ્ટાભિરામઃ ।
વ્યાખ્યાપીઠે નિષણ્ણો મુનિવરનિકરૈઃ સેવ્યમાનઃ પ્રસન્નઃ
સવ્યાલઃ કૃત્તિવાસાઃ સતતમવતુ નો દક્ષિણામૂર્તિરીશઃ ॥ ૮॥

મન્ત્રેણ ન્યાસઃ । [બ્રહ્મર્ષિન્યાસઃ ।]
તારં પરં રમાબીજં વદેત્સાંબશિવાય ચ ।
તુભ્યં ચાનલજાયાં મનુર્દ્વાદશવર્ણકઃ ॥ ૯॥

વીણાં કરૈઃ પુસ્તકમક્ષમાલાં
બિભ્રાણમભ્રાભગલં વરાઢ્યમ્ ।
ફણીન્દ્રકક્ષ્યં મુનિભિઃ શુકાદ્યૈઃ
સેવ્યં વટાધઃ કૃતનીડમીડે ॥ ૧૦॥

વિષ્ણૂ ઋષિરનુષ્ટુપ્ છન્દઃ । દેવતા દક્ષિણાસ્યઃ ।

મન્ત્રેણ ન્યાસઃ ।
તારં નમો ભગવતે તુભ્યં વટપદં તતઃ ।
મૂલેતિ પદમુચ્ચાર્ય વાસિને પદમુદ્ધરેત્ ॥ ૧૧॥

પ્રજ્ઞામેધાપદં પશ્ચાદાદિસિદ્ધિં તતો વદેત્ ।
દાયિને પદમુચ્ચાર્ય માયિને નમ ઉદ્ધરેત્ ॥ ૧૨॥

વાગીશાય તતઃ પશ્ચાન્મહાજ્ઞાનપદં તતઃ ।
વહ્નિજાયાં તતસ્ત્વેષ દ્વાત્રિંશદ્વર્ણકો મનુઃ ।
આનુષ્ટુભો મન્ત્રરાજઃ સર્વમન્ત્રોત્તમોતમઃ ॥ ૧૩॥

ધ્યાનમ્ ।
મુદ્રાપુસ્તકવહ્નિનાગવિલસદ્બાહું પ્રસન્નાનનં
મુક્તાહારવિભૂષણં શશિકલાભાસ્વત્કિરીટોજ્જ્વલમ્ ।
અજ્ઞાનાપહમાદિમાદિમગિરામર્થં ભવાનીપતિં
ન્યગ્રોધાન્તનિવાસિનં પરગુરું ધ્યાયામ્યભીષ્ટાપ્તયે ॥ ૧૪॥

મૌનમુદ્રા ।
સોઽહમિતિ યાવદાસ્થિતિઃ સનિષ્ઠા ભવતિ ।
તદભેદેન મન્ત્રામ્રેડનં જ્ઞાનસાધનમ્ ।
ચિત્તે તદેકતાનતા પરિકરઃ । અઙ્ગચેષ્ટાર્પણં બલિઃ ।
ત્રીણિ ધામાનિ કાલઃ । દ્વાદશાન્તપદં સ્થાનમિતિ ।
તે હ પુનઃ શ્રદ્દધાનાસ્તં પ્રત્યૂચુઃ ।
કથં વાઽસ્યોદયઃ । કિં સ્વરૂપમ્ । કો વાઽસ્યોપાસક ઇતિ ।
સ હોવાચ ।
વૈરાગ્યતૈલસમ્પૂર્ણે ભક્તિવર્તિસમન્વિતે ।
પ્રબોધપૂર્ણપાત્રે તુ જ્ઞપ્તિદીપં વિલોકયેત્ ॥ ૧૫॥

મોહાન્ધકારે નિઃસારે ઉદેતિ સ્વયમેવ હિ ।
વૈરાગ્યમરણિં કૃત્વા જ્ઞાનં કૃત્વોત્તરારણિમ્ ॥ ૧૬॥

ગાઢતામિસ્રસંશાન્ત્યૈ ગૂઢમર્થં નિવેદયેત્ ।
મોહભાનુજસંક્રાન્તં વિવેકાખ્યં મૃકણ્ડુજમ્ ॥ ૧૭॥

તત્ત્વાવિચારપાશેન બદ્ધં દ્વૈતભયાતુરમ્ ।
ઉજ્જીવયન્નિજાનન્દે સ્વસ્વરૂપેણ સંસ્થિતઃ ॥ ૧૮॥

શેમુષી દક્ષિણા પ્રોક્તા સા યસ્યાભીક્ષણે મુખમ્ ।
દક્ષિણાભિમુખઃ પ્રોક્તઃ શિવોઽસૌ બ્રહ્મવાદિભિઃ ॥ ૧૯॥

સર્ગાદિકાલે ભગવાન્વિરિઞ્ચિ-
રુપાસ્યૈનં સર્ગસામર્થ્યમાપ્ય ।
તુતોષ ચિત્તે વાઞ્છિતાર્થાંશ્ચ લબ્ધ્વા
ધન્યઃ સોપાસ્યોપાસકો ભવતિ ધાતા ॥ ૨૦॥

ય ઇમાં પરમરહસ્યશિવતત્ત્વવિદ્યામધીતે સ સર્વપાપેભ્યો મુક્તો ભવતિ ।
ય એવં વેદ સ કૈવલ્યમનુભવતીત્યુપનિષત્ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ દક્ષિણામૂર્ત્યુપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*DakShinamurti Upanishad*

pdf was typeset on June 11, 2024

Please send corrections to *sanskrit@cheerful.com*